Shri Shodashi Hridaya

# श्रीषोडशीहृदयम् अथवा श्रीललितात्रिपुरसुन्दरीहृदयस्तोत्रम्

## Document Information

Text title : ShoDashI Hridayam

File name : ShoDashIhRidaya.itx

Category : hRidaya, devii, dashamahAvidyA, devI, lalitA

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay

Latest update : June 13, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीषोडशीहृदयम् अथवा श्रीललितात्रिपुरसुन्दरीहृदयस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

॥ श्रीउमामहेश्वराभ्यां नमः ॥

॥ अथ श्रीषोडशीहृदयप्रारम्भः ॥
कैलासे करुणाक्रान्ता परोपकृतिमानसा ।
पप्रच्छ करुणासिन्धुं सुप्रसन्नं महेश्वरम् ॥ १॥
श्रीपार्वत्युवाच ॥
आगामिनि कलौ ब्रह्मन् धर्मकर्मविवर्जिताः ।
भविष्यन्ति जनास्तेषां कथं श्रेयो भविष्यति ॥ २॥
श्रीशिव उवाच ॥
शृणु देवि प्रवक्ष्यामि तव स्नेहान्महेश्वरि ।
दुर्लभं त्रिषु लोकेषु सुन्दरीहृदयस्तवम् ॥ ३॥
ये नरा दुःखसन्तप्ता दारिद्र्यहतमानसाः ।
अस्यैव पाठमात्रेण तेषां श्रेयो भविष्यति ॥ ४॥
विनियोगः
ॐ अस्य श्रीमहाषोडशीहृदयस्तोत्रमन्त्रस्य आनन्दभैरव ऋषिः ।
देवी गायत्री छन्दः । श्रीमहात्रिपुरसुन्दरी देवता ।
ऐं बीजम् । सौः शक्तिः । क्लीं कीलकम् ।
धर्मार्थकाममोक्षार्थे जपे (पाठे) विनियोगः ।
॥ अथ ऋष्यादिन्यासः ॥

ॐ आनन्दभैरवऋषये नमः शिरसि ।
देवी गायत्री छन्दसे नमः मुखे ।
श्रीमहात्रिपुरसुन्दरीदेवतायै नमः हृदये ।
ऐं बीजाय नमः नाभौ ।

सौः शक्तये नमः स्वाधिष्ठाने ।
क्लीं कीलकाय नमः मूलाधारे ।
विनियोगाय नमः पादयोः ॥
॥ इति ऋष्यादिन्यासः ॥

॥ अथ करन्यासः ॥

ऐं ह्रीं क्लीं अङ्गुष्ठाभ्यां नमः ।
क्लीं श्रीं सौः ऐं तर्जनीभ्यां नमः ।
सौः ॐ ह्रीं श्रीं मध्यमाभ्यां नमः ।
ऐं कएलह्रीं हसकलह्रीं अनामिकाभ्यां नमः ।
क्लीं सकल कनिष्ठिकाभ्यां नमः ।
सौः सौः ऐं क्लीं ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ।
॥ इतिकरन्यास ॥

॥ अथ हृदयादिषडङ्गन्यासः ॥

ऐं ह्रीं क्लीं हृदयाय नमः ।
क्लीं श्रीं सौः ऐं शिरसे स्वाहा ।
सौः ॐ ह्रीं श्रीं शिखायै वषट् ।
ऐं कएलह्रीं हसकलह्रीं कवचाय हुम् ।
क्लीं सकल नेत्रत्रयाय वौषट् ।
सौः सौः ऐं क्लीं ह्रीं श्रीं अस्त्राय फट् ॥
॥ इति हृदयादिषडङ्गन्यासः ॥

॥ अथ ध्यानम् ॥
बालव्यक्तविभाकरामितनिभां भव्यप्रदां भारती-
मीषत्फुल्लमुखाम्बुजस्मितकरैराशाभवान्धापहाम् ।
पाशं साभयमङ्कुशं च वरदं सम्बिभ्रतीं भूतिदां
भ्राजन्तीं चतुरम्बुजाकृतकरैर्भक्त्या भजे षोडशीम् ॥ ५॥
॥ इति ध्यानम् ॥

सुन्दरी सकलकल्मषापहा कोटिकञ्जकमनीयकान्तिभृत् ।
Var (कोटिकञ्जप्रियकाम्यकान्तिका)
कोटिकल्पकृतपुण्यकर्मणा पूजनीयपदपुण्यपुष्करा ॥ ६॥
शर्वरीशसमसुन्दरानना श्रीशशक्तिसुकृताश्रयाश्रिता ।

सज्जनानुशरणीयसत्पदा सङ्कटे सुरगणैः सुवन्दिता ॥ ७॥
या सुरासुररणे जवान्विता आजघान जगदम्बिकाऽजिता । सञ्जघान
तां भजामि जननीं जगज्जनिं युद्धयुक्तदितिजान्सुदुर्जयान् ॥ ८॥
Var तां भजामि जगतां जनिं जयां युद्धयुक्तदितिजान्सुदुर्जयान्
योगिनां हृदयसङ्गतां शिवां योगयुक्तमनसां यतात्मनाम् ।
जाग्रतीं जगति यत्नतो द्विजा यां जपन्ति हृदि तां भजाम्यहम् ॥ ९॥
कल्पकास्तु कलयन्ति कालिकां यत्कला कलिजनोपकारिका ।
कौलिकालिकलितान्घ्रिपङ्कजां तां भजामि कलिकल्मषापहाम् ॥ १०॥
Var कौलिकालिकलितान्घ्रिकञ्जकां
बालार्कानन्तशोचिर्न्निजतनुकिरणैर्द्दीपयन्तीं दिगन्तान्
दीप्तैर्द्देदीप्यमानां दनुजदलवनानल्पदावानलाभाम् ।
दान्तोदन्तोग्रचितां दलितदितिसुतां दर्शनीयां दुरन्तां
देवीं दीनार्द्रचित्तां हृदि मुदितमनाः षोडशीं संस्मरामि ॥ ११॥
धीरान्धन्यान्धरित्रीधवविधृतशिरो धूतधूल्यब्जपादां
घृष्टान्धाराधराधो विनिधृतचपलाचारुचन्द्रप्रभाभाम् ।
धर्म्यान्धूतोपहारान्धरणिसुरधवोद्धारिणीं ध्येयरूपां
धीमद्धन्यातिधन्यान्धनदधनवृतां सुन्दरीं चिन्तयामि ॥ १२॥
जयतु जयतु जल्पा योगिनी योगयुक्ता
जयतु जयतु सौम्या सुन्दरी सुन्दरास्या ।
जयतु जयतु पद्मा पद्मिनी केशवस्य
जयतु जयतु काली कालिनी कालकान्ता ॥ १३॥
जयतु जयतु खर्वा षोडशी वेदहस्ता
जयतु जयतु धात्री धर्मिणी धातृशान्तिः ।
जयतु जयतु वाणी ब्रह्मणो ब्रह्मवन्द्या
जयतु जयतु दुर्गा दारिणी देवशत्रोः ॥ १४॥
देवि त्वं सृष्टिकाले कमलभवभृता राजसी रक्तरूपा
रक्षाकाले त्वमम्बा हरिहृदयधृता सात्विकी श्वेतरूपा ।
भूरिक्रोधा भवान्ते भवभवनगता तामसी कृष्णरूपा
एताश्चान्यास्त्वमेव क्षितमनुजमला सुन्दरी केवलाद्या ॥ १५॥
सुमलशमनमेतद्देवि गोप्यं गुणज्ञे
ग्रहणमननयोग्यं षोडशीयं खलघ्नम् ।
सुरतरुसमशीलं सम्प्रदं पाठकानां

प्रभवति हृदयाख्यं स्तोत्रमत्यन्तमान्यम् ॥ १६॥
इदं त्रिपुरसुन्दर्याः षोडश्याः परमाद्भुतम् ।
यः शृणोति नरः स्तोत्रं स सदा सुखमश्नुते ॥ १७॥

न शूद्राय प्रदातव्यं शठाय मलिनात्मने । समलात्मने
देयं दान्ताय भक्ताय ब्राह्मणाय विशेषतः ॥ १८॥

इति श्रीषोडशीहृदयस्तोत्रं अथवा श्रीललितात्रिपुरसुन्दरीह्रिदयस्तोत्रं समाप्तम् ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

---

*Shri Shodashi Hridaya*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*